# Shri Shankara Mahatmyam

# શ્રીશઙ્કરમાહાત્મ્યમ્

## Document Information

Text title : Shankara Mahatmyam

File name : shankaramAhAtmyam.itx

Category : shiva, vAsudevAnanda-sarasvatI, mAhAtmya

Location : doc_shiva

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીશઙ્કરમાહાત્મ્યમ્

ઈશાવાસ્યમિદં સર્વં ચક્ષોઃ સૂર્યો અજાયત ।
ઇતિ શ્રુતિરુવાચાતો મહાદેવઃ પરાવરઃ ॥ ૧॥

અષ્ટમૂર્તેરસૌ સૂર્યો મૂર્તિત્વે પરિકલ્પિતઃ ।
નેત્રં ત્રિલોચનસ્યૈકમસૌ સૂર્યસ્તદાશ્રિતઃ ॥ ૨॥

યસ્ય ભાસા સર્વમિદં વિભાતીતિ શ્રુતેરિમે ।
તમેવ ભાન્તમીશાનમનુભાન્તિ ખગાદયઃ ॥ ૩॥

ઈશાનઃ સર્વવિદ્યાનાં ભૂતાનાં ચેતિ ચ શ્રુતેઃ ।
વેદાદીનામપ્યધીશઃ સ બ્રહ્મા કૈર્ન પૂજ્યતે ॥ ૪॥

યસ્ય સંહારકાલે તુ ન કિઞ્ચિદવશિષ્યતે ।
સૃષ્ટિકાલે તુ પુનઃ સર્વં સ એકઃ સૃજતિ પ્રભુઃ ॥ ૫॥

સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ ।
ઇતિશ્રુતેર્મહાદેવઃ શ્રેષ્ઠોઽર્ચ્યઃ સકલાર્ચિતઃ ॥ ૬॥

વિશ્વં ભૂતં ભવદ્ભવ્યં સર્વં રુદ્રાત્મકં શ્રુતમ્ ।
મૃત્યુઞ્જયસ્તારકોઽતઃ સ યજ્ઞસ્ય પ્રસાધનઃ ॥ ૭॥

વિષમાક્ષોઽપિ સમદૃક્સાશિવોઽપિ શિવઃ સ ચ ।
વૃષસંસ્થોઽપ્યતિવૃષો ગુણાત્માપ્યગુણોઽમલઃ ॥ ૮॥

યદાજ્ઞામુદ્વહન્ત્યત્ર શિરસા સાસુરાઃ સુરાઃ ।
અન્નં વાતો વર્ષ ઇતીષવો યસ્ય સ વિશ્વપાઃ ॥ ૯॥

ભિષક્તમં ત્વાં ભિષજાં શૃણોમીતિ શ્રુતેરયમ્ ।
સ્વભક્તસંસારમહારોગહર્તાપિ શઙ્કરઃ ॥ ૧૦॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીશઙ્કરમાહાત્મ્યં સમ્પૂર્ણમ્ ।

*Shri Shankara Mahatmyam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*